# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College under University of Calcutta)

**M.A./M.Sc. FOURTH SEMESTER EXAMINATION, MAY 2015**

**SECOND YEAR**

Date : 19/5/2015 **SANSKRIT (*Kāvya*)**

Time : 11 am – 3 pm Paper : XI Full Marks : 100

1. अधोलिखितेषु कश्चि**<u>देक:</u>** प्रश्न: समाधेय:। [1×10]
   - क) कथाख्यायिकयो: भेदमुल्लिख्य 'हर्षचरितम्' कथा आख्यायिका वेति विचारय।
   - ख) हर्षचरितस्य पञ्चमोच्छ्वासे वर्णित: यशोवत्या: उपदेश: समासत: वर्णनीय:।

2. कस्यचित् प्रश्न**<u>पञ्च</u>**कस्य उत्तरं दातव्यम्। [5×2]
   - क) हर्षचरितस्य रचयिता क: ? हर्षचरितं विहाय तस्य अपरग्रन्थस्य नाम लिख्यताम्।
   - ख) हर्षचरितस्य पञ्चमोच्छ्वास: किंनाम्ना व्यपदिश्यते ? हर्षचरितस्योपरि यस्य कस्यचित् टीकाया नाम लेख्यम्।
   - ग) प्रभाकरवर्धन: कमाहूय कान् वा हन्तुमुत्तरापथं प्राहिणोत् ?
   - घ) नग्नाटक: क: ? हर्षचरितस्य पञ्चमोच्छ्वासे हर्षेण दृष्टस्य नग्नाटकस्य लाञ्छनं किमासीत् ?
   - ङ) कुरङ्गक: क: ? कं निकषा स कं संवादमादाय गत: ?
   - च) 'सुषेण! अस्ति तातस्य विशेषो न वा ?' —सुषेण: क: ? हर्षवर्धनकृतस्य प्रश्नस्य उत्तरेण स किमब्रवीत् ?
   - छ) भण्डिमुख: क: ? स हर्षदेवं किं विज्ञापितवान् ?

3. **<u>एकस्य</u>** प्रश्नस्य उत्तरं प्रदेयम्। [1×10]
   - क) 'दण्डिन: पदलालित्यम्' इति सदृष्टान्तं व्याख्येयम्।
   - ख) को नाम चन्द्रपालित: ? स कथं राजसमीपमागत्य व्यसनविलासचर्चां साधयति, तद्विशद्यताम्।

4. प्रश्न**<u>पञ्च</u>**कस्योत्तरं दातव्यम्। [5×2]
   - क) 'विश्रुतचरितम्' दशकुमारचरितस्य कस्मिन् उच्छ्वासे विलसति ? विश्रुतचरितस्य नामकरणं कथं कृतं दण्डिना ?
   - ख) विश्रुत: केषां पुरत: तच्चरितं वर्णयति ? स विन्ध्यारण्यं कथं गत: ?
   - ग) बालक: कथं क्लिष्ट: ? तस्य क्लेशस्य कारणं किम् ?
   - घ) कस्य जनपदस्य वर्णनं केन विवृतम् ? तत्र को नाम राजा आसीत् ?
   - ङ) अनन्तवर्मण: पुत्रस्य कन्याया: पत्न्याश्च नामानि लिख्यन्ताम्।
   - च) वसुरक्षित: क आसीत् ? स राजपुत्रम् अनन्तवर्माणं कमुपदेशं दातुमैच्छत् ?
   - छ) अश्मकराजस्य अमात्यस्य नाम किम् ? स कथङ्कारं विदर्भमागत्य समुपस्थित: ?

5. **<u>एकस्य</u>** प्रश्नस्य उत्तरं प्रदेयम्। [1×10]
   - क) ''...कन्यकां ददर्श'' — को जन: कदा कुत्र कां कन्यकां ददर्श ? सा च कन्या कीदृश्यासीदिति भवत्पाठ्यांशानुसारं वर्णनीयम्। [3+7]
   - ख) ''बाणोच्छिष्टं जगत् सर्वम्'' — इति वचनस्य सार्थक्यं सोदाहरणं प्रतिपाद्यताम्।

6. अधोलिखितेषु प्रश्नेषु **<u>पञ्च</u>** प्रश्ना: समाधेया:। [5×2]
   - क) अग्निपुराणानुसारं गद्यकाव्यविभागानां नामानि लेख्यानि।
   - ख) कादम्बर्य्यां नायक: क: ? कश्च तस्य जनक: ?
   - ग) के तावत् सप्तर्षय: ?
   - घ) कस्मात् प्राप्तेन केन वस्त्रेण महाश्वेताया: शरीरं पवित्रीकृतम् ?
   - ङ) केन कथं शिवस्य शरणं गृहीतम् ?
   - च) 'आप्रपदीनेन' — इत्येतस्य व्युत्पत्ति: का ?
   - छ) का नाम गन्धर्वविद्या ? सा कस्य वेदस्योपवेद: ?

7. **<u>एकस्य</u>** प्रश्नस्य उत्तरं प्रदेयम्। [1×10]

क) आधुनिक-संस्कृतसाहित्ये सिद्धेश्वर-चट्टोपाध्यायस्य अवदानमधिकृत्य प्रबन्धं रचय।

ख) श्रीजीवन्यायतीर्थस्य जीवनवृत्तं संक्षेपेणालोच्य तद्रचित-प्रहसनानि अधिकृत्य प्रबन्धं विरचय।

8. अधोलिखितेषु **<u>पञ्च</u>**विषयाणां टीका कार्या। [5×2]

धरित्रीपतिनिर्वाचनम्, अथ भेजालकथा, न्यायवैशेषिकदर्शनविमर्शः, चौरचातुरीयम्, हरिदाससिद्धान्तवागीशः, अथ किम्, दरिद्रदुर्दैवम्।

9. कमपि विषय**<u>मेक</u>**मधिकृत्य प्रबन्धो विरचनीयः। [1×20]

क) अलंकारप्रस्थानम्

ख) रसप्रस्थानम्

ग) संस्कृतकाव्यालंकारशास्त्रसमीक्षायां जगन्नाथस्य मौलिकत्वम्।

——— × ———